दहनीयभिषक् यथा,—
"अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित्।
रोगिभ्योऽर्थं समादत्ते स दहनचौरवद्भिषक्॥"
इति ज्योतिस्तत्त्वम्॥
तस्यान्नस्याभोज्यत्वं यथा,—
"शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः।
चिकित्सकस्य क्रूरस्य तथा स्त्रीमृगजीविनाम्॥
शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेत्॥"
व्रती यावकेन। तत्र धेनुद्वयम्। इति प्रायश्चित्तविवेकः॥ अपि च।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्।
विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम्॥"
इति मानवे ४ अध्यायः॥
(शतधन्वनः क्षेत्रजः पुत्त्रः। यथा, हरिवंशे। ३८। ६।
"शतधन्वात्मजस्तेषां शतधन्वा तु मध्यमः।
देवर्षेर्वचनात् तस्य भिषग्वैतरणश्च यः॥"
औषधम्। यथा, ऋग्वेदे। १। २४। ९।
"शतं ते राजन् भिषजः सहस्रमुर्वी
गभीरा सुमतिष्टे अस्तु॥"
"हे राजन्! वरुण! ते तव शतं भिषजः सहस्रं बन्धनिवारकाणि शतसहस्रसंख्याकान्यौषधानि वैद्या वा सन्ति।" इति तद्भाष्ये सायनः॥)
भिषक्प्रिया, स्त्री, (भिषजः प्रिया।) गुडूची। इति राजनिर्घण्टः॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या॥)
भिषग्जितं, क्ली, (भिषजा जितम्।) औषधम्। इति त्रिकाण्डशेषः॥ (चिकित्सा॥ यथास्य पर्य्यायः।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्-जितम्॥"
इति वैद्यकरत्नमालायाम्॥)
भिषग्भद्रा, स्त्री, (भिषजि औषधे वैद्ये वा भद्रा शुभदायिका।) भद्रदन्तिका। इति राजनिर्घण्टः॥
भिषङ्माता, [ऋ] स्त्री, (भिषजां मातेव।) वासकः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायः।
"वासको वाशिका वाषा भिषङ्माता च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादाटरूषोऽटरूषकः॥
आटरूषो वृषस्तामः सिंहपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
भिस्सटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ+"अन्येभ्योऽपीति डः। ततः पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरः। २। ९। ४९॥ अस्य रूपान्तरम्। भिस्सिटा। भिश्शिटा। भिश्शिटा। भिश्शिका। इति तट्टीकासारसुन्दरी॥
भिस्सा, स्त्री, (बभस्तीति। भस दीप्तौ+बाहुलकात् सः। छन्दसि बहुलमितीत्वम्। ब्राह्मण-भिस्सेति भाष्यप्रयोगाल्लोकेऽपि। यद्वा, भेदनमिति भित्। भिद्+क्विप्। भिदं स्यतीति। सो+"आतोऽनुपसर्गे कः।" इति कः। पृषोदरादित्वात् साधुः।) अन्नम्। इत्यमरः। २। ९। ४८॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्धश्च क्वचित् कूरश्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि-भाषितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
भिस्सिटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ+डः। पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरटीकासारसुन्दरी॥
भी, ग गि भ्रंशाय। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-अनिट्।) ग, भीनाति। गि, भिनाति। भीनः भीनिः। गिनैव क्र्यादित्वसिद्धौ गणद्वयं प्वादित्वविकल्पार्थं चकारात् भीनाश्च। इति दुर्गादासः॥
भी, ञि लि भीत्याम्। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-अक०-अनिट्।) ञि, भीतोऽस्ति। लि, बिभेति। इति दुर्गादासः॥
भीः, स्त्री, (भी भीत्याम्+सम्पदादित्वात् क्विप्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, आर्य्यासप्तशत्याम्। ३८७।
"पूर्व्वाधिको गृहिण्याम् बहुमानः प्रेमनर्म्म-विश्वासः।
भीरधिकेयं कथयति रागं बालाविभक्तमिव॥")
भीतं, क्ली, (भी ञि भीत्याम्+क्तः।) भयम्। भययुक्ते, त्रि। इति मेदिनी। ते, ४०॥ (यथा, मनुः। ७। ९४।
"यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते॥")
भीतिः, स्त्री, (भी+क्तिन्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, मार्कण्डेये। ८४। १६।
"दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥")
कम्पः। इति विश्वः॥
भीमं, त्रि, (बिभेत्यस्मादिति। भी+"भियः षुग्वा।" उणा० १। १४७। बिभेतेर्मक् धातोर्वा षुगागमश्च। इति मक्।) भयहेतुः। तत्पर्य्यायः। भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९। इत्यमरः। १। ७। २०॥ (यथा, रघुः। १। १६।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥")
भीमः, पुं, (बिभेत्यस्मादिति। भी+मक्।) भयानकरसः। यथा,—
"भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः॥"
इत्यमरटीकायां भरतः॥
शिवः। (यथा, मार्कण्डेये। ५२। ७।
"भवं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः।
भीममुग्रं महादेवमुवाच स पितामहः॥"
विष्णुः। यथा, महाभारते। १३। १४९। ५२।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः॥")
मध्यमपाण्डवः। (यथा, महाभारते। १। १२३। १३।
"तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम्॥)
अम्लवेतसः। इति मेदिनी। मे, २१॥ महादेवस्याष्टमूर्त्त्यन्तर्गताकाशमूर्त्तिः। यथा। भीमाय आकाशमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः॥ (गन्धर्व्वविशेषः। यथा, महाभारते। १। ६५। ४३।
"भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्वशी॥"
पुरुवंशीयस्य ईलिनस्य पुत्त्रः। यथा, तत्रैव। १। ९४। १८।
"ईलिनी जनयामास दुष्मन्तप्रभृतीन् नृपान्।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च॥")
भीमनादः, पुं, (भीमो भैरवो नादो यस्य।) सिंहः। इति शब्दचन्द्रिका॥ (भीमो नादः शब्दः। इति विग्रहे भयानकशब्दः। यथा, चातकाष्टके। १।
"वातैर्विधूनय विभीषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः।
त्वद्दारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद! चातकस्य॥"
भयानकशब्दविशिष्टे, त्रि। यथा, महाभारते। १। १५६। ३१।
"भीमनादं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महा-रवम्॥")
भीमरथः, पुं, (भीमो भयानको रथोऽस्य।) तामसमनुवंशजातासुरविशेषः। स च कूर्म्मरूपिणा हरिणा हतः। यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः॥"
इति गारुडे गयामाहात्म्ये ८६ अध्यायः॥
(धृतराष्ट्रस्य पुत्त्रभेदः। यथा, महाभारते। १। ११७। ११।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः॥")
भीमरथी, स्त्री, जनानामवस्थाविशेषः। यथा,—
"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणां दुरतिक्रमा॥"
इति शब्दमाला॥
अपि च।
"सप्तसप्ततिवर्षाणां सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणामतिदुस्तरा।
तामतीत्य नरो योऽसौ दिनानि यानि जीवति।
क्रतुभिस्तानि तुल्यानि सुवर्णशतदक्षिणैः।
गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभाषणम्।
ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः॥"
इति वैद्यकम्॥
नदीभेदः। यथा राजनिर्घण्टे।
मलापहा भीमरथी च वङ्गा
पद्मा च कृष्णा जलसाम्यगा गुणैः॥"